# संस्कृतम्

# (309)

समयः —होरात्रयम् ]　　　　　　　　　　　　　　[ पूर्णाङ्काः —100

**निर्देशाः —** (i) अस्मिन् प्रश्नपत्रे **द्वौ** खण्डौ स्तः। खण्ड—क (केन्द्रिक पाठ्यक्रमः), खण्ड—ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः।

(ii) खण्ड—क अनिवार्यः। अस्मिन् खण्डे *20* प्रश्नाः सन्ति।

(iii) खण्ड—ख **एकः** एव वैकल्पिकः समाधेयः।

(iv) खण्ड—क कृते *85* अङ्काः, खण्ड—ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः। अस्य कृते *15* अङ्काः निर्धारिताः।

## खण्ड—क

## केन्द्रिक पाठ्यक्रमः

**1.** अधोलिखितेषु कस्यचि**देकस्य** पाठस्य सारं षड्वाक्येषु लिखत—　6

(क) क्रोधोऽनर्थकारकः

(ख) पतन्ति परपीडकाः

(ग) राजते खलु कन्याकुमारी

**2.** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत—　1×4=4

ते चत्वारः सखायः वर्त्तिकाः गृहीत्वा हिमालयं प्रति अगच्छन्। तदा एकस्य जनस्य हस्तात् वर्त्तिका अपतत्। तदनु यावत् स भूमिं खनति तावत् ताम्रं निस्सरति। अहो! गृह्यतां स्वेच्छया ताम्रं स उच्चैः अवदत्। अन्ये अवदन्—भो मूढ! किम् अनेन ताम्रेण?

**प्रश्नाः**

(क) चत्वारः सखायः कुत्र अगच्छन्?

(ख) कस्य हस्तात् वर्त्तिका अपतत्?

(ग) ताम्रं कुतः निस्सरति?

(घ) अन्ये किम् अवदन्?

**3.** अधोलिखितानां प्रश्नानाम् उचितमुत्तरं चित्वा लिखत— 1×4=4

(क) कन्याकुमार्या कः हतः?

( महिषासुरः / बाणासुरः )

(ख) गुरुजनानां कथं विधानि चरितानि शिष्येण उपास्यानि?

( सुचरितानि / दुश्चरितानि )

(ग) वैज्ञानिकाः अन्तरिक्षात् कस्याः सौन्दर्यं वर्णितवन्तः?

( नद्याः / पृथिव्याः )

(घ) ग्रहाणां वर्णनं कस्मिन् शास्त्रे वर्तते?

( धर्मशास्त्रे / ज्योतिषशास्त्रे )

**4.** (क) रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत— 1×2=2

*(i)* द्वीपं परितः सागराणां शोभा अवर्णनीया अस्ति।

*(ii)* भोजस्य राज्ये कोऽपि जनः पापनिरतः नासीत्।

(ख) प्रश्नान् उत्तरत— 1×2=2

*(i)* सुश्रुतः कस्य शिष्यः आसीत्?

*(ii)* दुर्वाससः शापात् सरस्वती कुत्र आगता?

**5.** एतत् कथनं कः कं प्रति कथयति? 2

(क) भोः पुत्राः, युष्माभिः नानादेशान् पर्यटद्भिः किं विचित्रं दृष्टम्?

(ख) साधवः परदुःखेन दुःखिनः भवन्ति।

**6.** अधोलिखितपद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत— 2+2=4

(क) अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः, पृथिव्या इव मानदण्डः॥

**प्रश्नौ**

*(i)* हिमालयः कस्यां दिशायां स्थितोऽस्ति?

*(ii)* हिमालयः कस्या मानदण्ड इव स्थितः अस्ति?

(ख) तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥

**प्रश्नद्वयम्**

*(i)* सज्जनाः अतिथीनां मानं केन वचसा कुर्वन्ति?

*(ii)* सतां गेहे कति वस्तूनि नोच्छिद्यन्ते?

**7.** अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत— 2

(क) सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।
कुतस्तद् धनलुब्धानामितश्चेतश्च धावताम्॥

अन्वयः —

सन्तोषामृततृप्तानां, शान्तचेतसाम्, यत् ________ *(i)* तत् इतः च इतः च ________ *(ii)* धनलुब्धानाम् कुतः।

(ख) नित्यं स्नेहार्द्रशिरसः, शिरःशूलं न जायते।
न खालित्यं न पालित्यं न केशाः प्रपतन्ति च॥

अन्वयः —

स्नेहार्द्रशिरसः, नित्यं शिरःशूलं, न ________ *(i)*।
न खालित्यं, न ________ *(ii)*, न च, केशाः, प्रपतन्ति।

**8.** अधोलिखितपद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत— 2

(क) विभवे सति किं प्रशस्तमौदार्यम्?

भावार्थः —

विभवे सति किं प्रशस्तम्? ———।

(ख) प्रवान्ति वाताः समुदीर्णवेगाः।

भावार्थः —

वर्षाकाले वाताः कथं प्रवान्ति? ———।

**9.** पद्यांशं 'अ' स्तम्भात् 'ब' स्तम्भेन सह मेलयत— 2

| स्तम्भ—अ | | स्तम्भ—ब | |
|---|---|---|---|
| *(i)* | पूजितं ह्यशनं नित्यम् | (क) | ब्रूते यश्चानृतं शश्वत् |
| *(ii)* | उत्तमाः मानमिच्छन्ति | (ख) | मध्ये यस्तस्य तिष्ठति |
| *(iii)* | न तस्यादिर्न तस्यान्तः | (ग) | बलमूर्जं च यच्छति |
| *(iv)* | को न प्रत्येतव्यो | (घ) | मानो हि महतां धनम् |

**10.** 'काले फलति सौभाग्यम्' इति नाटके राजा साधुं, व्यापारिणं, नर्तकीं च लब्धदत्तस्य पार्श्वे किमर्थं क्रमशः प्रेषयति इति प्रश्नस्य उत्तरं षड्वाक्येषु लिखत। सहायतायै बिन्दव दत्ताः — 6

**बिन्दवः**

लब्धदत्तः, प्राणरक्षां, राज्ञः, किमपि, न, एकदा, राजा, बीजपूरं, फलं, सः, उदरपूरणाय, विक्रीतवान्, त्रिभ्यः, जनेभ्यः सन्तोषवृत्तिं, दृष्ट्वा, रत्नपूरितं, फलं तस्मै दत्तवान्।

**11.** (क) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत— 1+1=2

राजा : सावेगमिव मे हृदयम्। गच्छ, यथानिर्दिष्टौ चाणूरमुष्टिकौ प्रवेशाय।

भटः : यदाज्ञापयति महाराजः। (निष्क्रान्तः)

राजा : यावदहमपि प्रासादमारुह्य चाणूरमुष्टिकयोर्युद्धं पश्यामि। (आरुह्य) मधुरिके, विघाट्यतां द्वारम्।

प्रतीहारी : यद् भर्त्ता आज्ञापयति।

(राजा प्रविश्योपविशति)
(ततः प्रविशतः चाणूरमुष्टिकौ)

भटः : एष महाराजः। उपसर्पेतां भवन्तौ।

उभौ : (उपेत्य) जयतु भर्त्ता।

राजा : चाणूरमुष्टिकौ सर्वयत्नेन युवाभ्यामानृण्यं कर्त्तव्यम्।

उभौ : शृणोतु भर्त्ता। करणसन्धाबन्धप्रहारैः युद्धविशेषैः सिद्धिं गच्छामः।

**प्रश्नाः**

*(i)* 'युवाभ्याम् आनृण्यं कर्त्तव्यम्' इति कंसः कौ प्रति कथयति?

*(ii)* चाणूरमुष्टिकौ कस्मिन् युद्धविशेषे दक्षौ आस्ताम्?

(ख) *(i)* वनप्रदेशः कीदृशः आसीत्?

*(ii)* यक्षाणां हृदयपरिवर्त्तनं कथं जायते? 1×2=2

**12.** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त-प्रश्नान् उत्तरत—

(क) **गद्यांशः**

अथ तां तथा शप्तां सरस्वतीं दृष्ट्वा शापकलकलं निवार्य पितामहः सुधीरम् उवाच, ''ब्रह्मन्, न खलु साधु-सेवितोऽयं पन्थाः येनासि प्रवृत्तः। क्षमा हि मूलं सर्वतपसाम्। परदोषदर्शनदक्षा दृष्टिरिव कुपिता बुद्धिः। न ते आत्मदोषं पश्यति। अतिरोषणश्चक्षुष्मानन्धः एव जनः। न हि कोपकलुषिता विमृशति मतिः कर्त्तव्यम् अकर्त्तव्यम् वा।''

**प्रश्नाः**

*(i)* कः शप्तां सरस्वतीं दृष्ट्वा दुर्वाससम् अवदत्? 1

*(ii)* क्षमा केषां मूलम्? 2

*(iii)* कोपकलुषिता बुद्धिः किं न विमृशति? 2

(ख) **पद्यांशः**

दुःखेन श्लिष्यते भिन्नं, श्लिष्टं दुःखेन भिद्यते।
भिन्ना श्लिष्टा तु या मैत्री, न सा स्नेहेन वर्तते॥

**प्रश्नाः**

*(i)* कीदृशी मैत्री दुःखेन श्लिष्यते? 1

*(ii)* घनिष्ठा मैत्री कथं भिद्यते? 2

*(iii)* स्नेहेन का मैत्री न वर्तते? 2

**13.** मञ्जूषापदसहायतया 'प्रातःकालः' इति विषयमधिकृत्य दशवाक्यानि लिखत। 1×10=10

| **मञ्जूषा** |
|---|
| सूर्यः, खगाः, कलरवं, जनाः, उत्थाय, भ्रमणाय, विद्यार्थिनः, विद्यालयं, मार्गेषु, जनाः, स्व-स्वकार्ये, वृद्धाः, स्त्रियः, उद्यमिनः, उद्योगं। |

**14.** भवान् सौरभः। भवतां विद्यालये संस्कृतपुस्तकानां न्यूनता अस्ति। तदर्थं विद्यालयस्य प्राचार्यं प्रति पत्रं लिखत। 6

**15.** भवान् रोगग्रस्तः अस्ति। अतः चिकित्सकस्य समीपं गत्वा कथं संवादं करिष्यति? तदर्थं चत्वारि वाक्यानि लिखत। 1×4=4

**16.** रेखाङ्कितपदे सन्धिच्छेदं कुरुत— 1

(क) तं स गोमायुरालोक्य स्नेहादागतसम्भ्रमम्।

(ख) जयेत् कदर्यं दानेन, जयेत् सत्येन चानृतम्।

**17.** (क) को हन्ति करिणां कुलम्? अत्र रेखाङ्कितपदे का विभक्तिः? किं च मूलपदम्? 2

(ख) यथानिर्दिष्टं कुरुत— 1+1=2

*(i)* चतुर्थः जनः कीदृशं पुरुषम् अपश्यत्?

(रेखाङ्कित क्रियापदं लट्लकारे परिवर्त्य लिखत)

*(ii)* सः अपि रत्नमयीं भूमिम् अलभत।

(रेखाङ्कितपदं लट्लकारे परिवर्त्य लिखत)

(ग) यथानिर्दिष्टं वाच्य-परिवर्तनं कुरुत— 1

बलरामेण मुष्टिकः हन्यते। (कर्तृवाच्ये)

**अथवा**

राज्ञा लब्धदत्ताय फलं दीयते। (कर्तृवाच्ये)

**18.** समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत— 1×5=5

(क) एकोऽपि वृक्षः राजाज्ञां विना ——— न शक्यते। (छिद् + तुमुन्)

(ख) ——— रक्ष्यते वनम्। (व्याघ्र + उचित-विभक्ति)

(ग) ——— नृपः क्रूरः आसीत्। (किम् + उचित-विभक्ति)

(घ) हिमालयस्य ——— दर्शनीया अस्ति। (उच्च + तल्)

(ङ) विविधानि —— कुत्र सन्ति? (नक्षत्र + उचित-विभक्ति)

**19.** रेखाङ्कितपदस्य विग्रहं कृत्वा लिखत— 2

(क) किं गुरुताया मूलं यदेतदप्रार्थनं नाम।

(ख) प्रियहितवचनस्य धर्मनिरतस्य।

**20.** अधोलिखितवाक्ये **एकम्** अव्ययम् **एकम्** उपसर्गं च चित्वा लिखत— 2

(क) जलयात्रा उत्सवः कदा आयोज्यते?

(ख) गीतायां कर्मणः महत्त्वं प्रतिपादितम्।

## खण्ड—ख

## वैकल्पिक–I

## ( संस्कृतं संस्कृतिश्च )

**21.** अधोलिखितकाव्यानां तेषां लेखकैः सह मेलनं कृत्वा लिखत— 2

| 'अ' | | 'ब' | |
|---|---|---|---|
| *(i)* | जानकीजीवनम् | (क) | रामभद्राचार्यः |
| *(ii)* | इंदिरागांधीचरितम् | (ख) | जी० बी० पल्सुले |
| *(iii)* | श्रीभार्गवराघवीयम् | (ग) | राजेन्द्रमिश्रः |
| *(iv)* | जवाहरज्योतिमहाकाव्यम् | (घ) | सत्यव्रतशास्त्री |

**22.** अधोलिखितप्रश्नान् उत्तरत—

(क) अधोलिखितसंख्यानां कृते संस्कृतपदानि लिखत— 2

$10^3$, $10^4$, $10^7$, $10^{10}$

(ख) शून्यस्य अवधारणा सर्वप्रथमं कुत्र प्राप्यते? तस्य संकेतः कस्मिन् ग्रंथे प्राप्यते? 2

(ग) संस्कृतवाङ्मये श्रीपतिः नामकस्य प्रसिद्धगणितज्ञस्य ग्रंथनाम लिखत। 2

(घ) भावमिश्रेण विरचिते 'भावप्रकाशः' इति नामके ग्रंथे कस्याः चिकित्सायाः वर्णनं विद्यते? 1

**23.** संस्कृतस्य लौकिकं रूपं कस्मात् ग्रन्थात् प्रारभते? 2

**24.** (क) भारतीयसंस्कृतौ शरीरम् अतिरिच्य कस्य सत्ता स्वीक्रियते? 1

(ख) चत्वारः वर्णाः केन नाम्ना ज्ञायन्ते? 2

(ग) संस्काराः कति संख्याकाः भवन्ति? 1

## वैकल्पिक–II

### ( प्रयोजनमूलकसंस्कृतम् )

**21.** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत— 1×4=4

(क) वैदिकशब्दानां ज्ञानं ——— इति वैदिककोशेन एव भवति।

(ख) सूर्यचन्द्रग्रहणकालः ——— सम्बन्धि चिन्तनं वर्तते।

(ग) भौतिकं रसायनं, रत्नविज्ञानादीनि ——— सन्ति।

(घ) संस्कृतज्ञानां कृते ——— पर्याप्ताः अवसराः सन्ति।

**22.** अधोलिखितप्रश्नान् उत्तरत— 1×4=4

(क) 'ज्ञानदर्शनम्' इति कस्य प्रणाली अस्ति?

(ख) जनसञ्चारस्य वैद्युदान्विकमाध्यमः कतिविधः अस्ति?

(ग) संस्कृतभाषायां निर्मितस्य प्रथमचलचित्रस्य नाम किमस्ति?

(घ) श्रावणमासस्य पौर्णमास्यां कः दिवसः आयोज्यते?

**23.** त्रैमासिकी पत्रिका का भवति? एकस्याः त्रैमासिकपत्रिकायाः नामोल्लेखं कुरुत। 2

**24.** (क) पत्रपत्रिकासु केषां संयोजनेन पत्रिकाया मनोरंजकता वर्द्धते? 1

(ख) आकर्षकस्य शीर्षकस्य का उपयोगिता? 1

(ग) मुद्रणत्रुटिशोधनाय चिह्नीकरणं कथं क्रियते? 1

(घ) '—' चिह्नं कस्य अभिप्रायस्य कृते प्रयुज्यते? 1

(ङ) सुस्पष्टानां चिह्नानाम् अभावे का संभावना भवति? 1

For any help and enquiry realted to NIOS please contact SS Coaching at 9839065533